३५ अस्यैवसरसस्तीरेतेपुस्तेपरमंतपः। कदाचित्कामिनीकाचिद्विचित्रपकस्तबक
स्तनी। चलापांगकलाकांततरंगितरसालया। नासामुक्ताफलज्योत्स्नाचुं
बितादंतदीधितिः। वीणांविन्यस्यकुचयोर्वनेस्मिन्मधुरंजगौ। गायंत्याः
स्वरमाकर्ण्यब्राह्मणाहरिणाइव। तामागत्यचतेसर्वेसममेवव्यलोकयन्।
ममयाहष्टाममैवेयमित्यूचुस्तेपरस्परं। मुष्टामुष्टिस्ततस्तेषांभ्रातृणा ॥श्री॥
मत्रवत्गुणः। अन्योन्यमुष्टिनिष्पिष्टवक्षसस्त्यक्तजीविताः। तेषुं ३५
न्यो न्यानिरयान्घोरान्बुभुजुः शरभौभुवि। तदातेभ्यापराजगुर्दंध्या

व न्वेनवद्दिना। ततोमांतंगनामेत्यपथिपांथानघातयन्। वनेविषोदकंपीला
तेपयुर्यममंदिरं। वैरवरोष्ट्रवृकमार्जारस्जन्मान्यासाद्यचक्रमात्। ततोम
धुव्रताजातावर्तेतेत्रसरोवरे। अद्यमेगंधमाघ्रायप्रापुस्तेवैस्तवंपदं।
शृणुपक्षींद्रवक्ष्याम्ययेनमप्यास्तिवैभवं। एतास्माज्जन्मनःपूर्वंतृतीये
जन्मनिस्थिता। जवदनानामद्विजानामस्मिकन्यका। पातिव्रत्यैक
नीरतागुरुशुश्रूषणेरता। कदाचित्सारिकामेकांपठंतीसात्मवि
तमा। सारिकाभवपायोतिपत्याशप्तास्मिकुप्यता। प्रेत्यसारिकाभा
साद्यपातिव्रत्यप्रसादतः। मुनीनामेवसदनेकन्याकाचित्तपोषमा।

गी॰मा॰ गीतायादशमाध्यायं विभूतिमितिविश्रुतं। प्रातःपठतिविप्रोसौ अभ्यायं
३८ तमघापहं। कालेनसारिकादेहम् हित्वाविहंगमं। दशमाध्यायमाहात्म्या
द्दिव्यं पुराचाम्हिदिवि। पद्मावतीतिविख्यातापद्मायादयितासखी। क
दाचनमयायांत्या विमानेनविहायसा। एतत्सरोवरेरम्याविलोक्य विमलांबु
जं। अवतीर्यजलक्रीडायावदारभ्यतेमया। दुर्वासास्तावदायातोविवस्त्रात
नवीक्षिता। तद्दृष्ट्वात्यक्तनीरूपं धृतमेतन्मयास्वयं। पक्षाप्पपत्रद्वयं चे
वक्षयं हस्तद्वयेनच। मुखेनपद्ममेकंच इतिपद्मांबुजाह्वयं। दृष्टुतेनमु ३८
निद्रुणा कोपाज्ज्वालितचक्षुषा। अनेनैवस्वरूपेण तिष्ठपापेरतंसमाः

इतिशापंसमुत्सृज्यनेनरांतर्दधेक्षणात्। विभूत्यध्यायमाहात्म्याद्दाणीमेन
विलीयते। मद्विलुंचनमात्रेणपतितोसिमहीतले। अद्यशापविनिर्मुक्ति
र्भविष्यतिखगोत्तम। निशामयमयागीयमानमध्यायमुत्तमं। अस्याकर्ण
नमात्रेणत्वमद्यैवविमोक्षसे। इत्यसौदशमाध्यायंपपाठ भ्रष्ट[illegible]भि क्ष्णाया
त। तमाकर्ण्यतयादत्तमादायचसरोरुहं। मयासमर्पितं तुभ्यं पीनन्या रु
जहौ दत्तमुत्तमं। इत्युक्त्वासखि[illegible]देहं तदद्भुतमिवाभवत्। भृंगिरिटिरुवाच।
पुरातनभवकोयं ब्रह्महंसोभवत्कथं। नवागतः कुतोहेतोः रुत्तरर्जे त
वरोत्तनु ।। इतिभृंगिरिटेर्वाक्यमाकर्ण्य हरिहंतराध्रुवं ।। ।।

गीता० द्विजो वेश्मनि पूर्वस्मिन्जन्मन्यस्मे प्यजायत। सुतपा इति विख्यातो ब्रह्मचा
३७ रीजितेंद्रियः॥ वसन्गुरुकुले ब्रह्मवेदाध्ययनमन्वहं। गुरुशुश्रूषणे सन्य
ग्विदधाति सभक्तितः॥ शयानस्य गुरोः शय्यां निद्रितः स्वपदास्पृशत्। तेन पा
पेन तिर्यक्त्वमयं स्वर्गे प्युपलब्धवान्। पद्मयोनिमरालानामध्येजातिस्मरो
द्विजः। अस्मिन्नन्मन्युमुष्येह पुरे स्मिंलोकनाविधि। गीतायादशमाध्यायं
समुल्लसति सर्वदा। गीतानां दशमाध्यायं नलिन्या कथितं तव॥ आकर्ण्य
ण्यां विहगो लेभे ब्रह्मज्ञानमनुत्तमं। सो यं च प्रकुले गीता दशमाध्या ३७
यवैभवात्। जन्माभ्यासवशादस्य शिशोरपि मुखात् बुजात्॥

गीतायादशमाध्यायं समुल्लसति सर्वदा। तदर्थपरिणामेन सर्वभूतेषु वस्थि
तं। शंखचक्रमयं देवमयं पश्यति सर्वदा। यस्मिन्यस्मिन्यतो वा स्य दृष्टिः स्नि
ग्धा शरीरिणः। स समुक्तो भवेत्तद्वा सुरापो ब्रह्मघातकः॥ तद्विज्ञायमया वि
प्र १ परमात्मस्वरूपिणा। इदं न स्वरमानीतो मुक्तिक्षेत्रं स्वभावतः। अत्र
त्यानां मनुष्याणां मुक्तिः करतले स्थिता। तेनास्य दृष्टिपातेन विशेषो नाहि
जायते। नददाति विहंगलुमस्य स्तोत्रपुरस्कृतं। दशमाध्यायमाहात्म्या
द्रात्मज्ञानं सुदुर्लभं। लब्धमेतेन मुनिना द जीवन्मुक्तो ह्ययं ततः॥ तेनास्य
पेक्षतो हस्तं ददामि प्रधिगच्छतः। दशमाध्यायमाहात्म्यं सोयं भूरि
रिदं महान्। इति भगीरथे नुग्रे कथितं तत्कथानकं। तदेवमत्र कथि

गीताम ...नं सर्वपापप्रणाशनं। यस्य श्रवणमात्रेण सर्वाश्चर्यफलं भवेत्॥ श्रीः॥
३८ इति श्रीपद्मपुराणे गीतामाहात्म्ये सतीश्वरसंवादे दशमोध्यायः॥ ५
श्रीदेव्युवाच। इतिहासोयमीशान श्रेयसां साधनं परं। आकर्ण्य करुणापू
र्णमिमं कांक्षा प्रवर्तते। एकादशस्य माहात्म्यमध्यायकथनाश्रयं। व्याकर्ण
यविरूपाशवकृष्णांप्रथमं विभो। ईश्वरः। आवर्णय कथां कांते गीतावर्ण पा
नसंश्रयां। विश्वरूपाभिधानस्य माहात्म्यमपि पावनं। अध्यायस्य
विशालाक्षि वक्तुं यातं न शक्यते। सहस्राणि कथा संति तत्रैकाकथ्यते ३८
कथा। प्रणीता यास्त्वतेन धामे घंकरदृनिभुतं। नगरं गरिमाधारं तुंग
प्राकारतोरणं। विशालाश्रमशालासु स्वर्णस्तंभविभूषितं॥ ॥

श्रीमद्भिः शुचिभिः शांतैः सदाचारैर्युतैर्द्विजैः। अधिष्ठितं जनैश्चारु शृंगार-
कमनोहरं। कीर्तिस्तंभस्फुरत्स्वर्णशत वेश्म सुशोभितं। पताकाकिंकिणी
क्वाणकंदंबकाकिलस्वरं वेदाध्ययननिर्घोषवाचालितदिगंतरं रूपसंघोष
संकीर्ण दिशाक्षव्योममंदिरं। पताकापल्लवोद्भूतवातनिर्जितविग्रहं। राजमार्ग
वरद्वारनारीमंजीरसंजितैः वल्लकीवेणुकेगहतै जीत्यवाजीद्रहेषितैः॥ भीषमा पि
णाभिवाभीष्टणंदिक्यालकानां पुरेसमं। आस्ते जगत्पतिर्यत्र शार्ङ्गपाणिर्वि
राजितः। मूर्तिमत्परमं ब्रह्म जगल्लोचनजीवितं। लक्ष्मीनयनराजीवपूजि
ताकारगौरवं। त्रिविक्रमवपुर्मेघश्याकोमलद्युतिः। श्रीवत्सवक्षो
राजीषवनमालाविभूषितः। अनेकभूषणोपेतः सन्नद्ध इव वारिधिः। पा

गीता० तडित्वोदामिनीदामसांद्रमेघसमद्युतिः तस्यास्ते मुकुटे साक्षा छाउ. पाणिः
३४ परःपुमान्। तंदृष्ट्वामुच्यतेजंतुर्जन्मसंसारबंधनात्। यस्मिन्पुरेमहीजी
र्थेविघतेमेघकोंछने। पुत्रस्नात्वानरोनित्यं प्राप्यते वैष्णवं पदं। तत्रवीक्ष्य
जगंन्नाथंनरसिंहंजनार्दनं। सप्तजन्मकृताद्घोरान्मुच्यतेबंधनान्नरः॥१मे
खैलाख्यांगणाधीशांविलोक्यव्रतयानरः। सानिस्तरातिदुःखानिदुस्तरा
ण्युपिसर्वदा। ब्रह्मचर्यपरोदांतोनिर्ममोनिरहंकृतिः। तस्मिन्मेघंक
रेक्षेश्चिद्भूद्ब्राह्मणसत्तमः सुनंदइतिविख्यातोवेदशास्त्रविशारदः
गी० वशीकृतेंद्रियग्रामोवासुदेवपरायणः। देवस्यशार्ङ्गिणःपार्श्वेगी
ताध्यायमिमंपठन्। एकादशंपठत्येवविश्वरूपप्रदर्शनं। अस्याभ्यासप्रभा

वेनब्रह्मज्ञानमवापसः। परमानंदसंदोहश्लाघ्यसंवित्समाधिना प्रत्यक्षुरेविंदु
गी० यदात्मनिब्रह्मकांस्थितिमीयुषः सततंदृश्यतेतेनजीवन्मुक्तेनयोगिना एकदासम
हायोगीश्सिंहराशिगतेगुरौ। गोदावरीतीर्थयात्रांसगंतुमुपचक्रमे सस्ना
त्वामेखलातीर्थेनत्वादेवंत्रिविक्रमं। प्रतस्थेगोतमीतीरंसहायैर्नास्तिकैर्वृतः प्रसंमे
क्रिसमागत्यविरजंतीर्थमुत्तमं। नाभिमारभ्यतीर्थेषुसमाराध्यैवदेवता॥ मङ्ग
गी० लंजगद्गुरुतिकमक्षांसमलोकयत्। तांसंपूज्यमहामायांसर्वकामफलप्रदां
धारातीर्थेनरःस्नात्वाकपिलासंगमेततः। अष्टतीर्थमसौस्नात्वाविधायापि
तत्तर्पणंकुमारीशंशिवंनात्वाकपिलोद्धारमाययौ। तत्रमज्जन्विनिर्धूतपा
रजन्मांतरनिष्कृतिः। संपूज्यनत्वास्तुत्वाचसंद्दश्यमधुसूदनं॥ उपित्वात

ततोरात्रिमगात्यातःसहद्विजैः। नरसिंहवनेतत्रतीर्थेरामस्यदीर्घिका प्रह्लाद
पूजितःसाक्षादास्तेतत्र हरिकेसरी तंदृष्ट्वादेवदेवेशंपूजयित्वातुभक्तितः
तत्रतंदिवसंनीत्वासययावंबिकापुरं। अत्रयहायक्षकानामंबिकायत्रतिष्ठति
पूरयित्वामनुष्याणांवांछितान्यखिलान्यपि। पूजयित्वांबिकांभक्त्यापुष्पगंधानु
लेपनैः॥३३ पहारैश्चविविधैः स्तोत्रैःप्रणामनैरपि विप्रस्तस्मात्पुरात्यातःकर्क
दस्थाभिधंपुरं। यत्रास्तेपरमाशक्तिर्महालक्ष्मीर्महाद्युतिः। तामवेक्ष्यसुधाम्नि
तुर्भास्करद्युतिमंडलं संसारतापविच्छेदपन्नपीयूषवाहिनी। योगिराजहृदं
भोजराजहंसनिषेवितं। अनाहतमहानादमयीमंडूयरूपिणीं। महालक्ष्मीं ४०
भगवतीं वांछितार्थप्रदायिनीं। आराध्यभक्तिभावेनचैवससमुनीश्वरः

× तंबभाषेग्रामपालमायुष्मानसिसर्वशः॥५

विहारमंडपंप्राप्यपुरंमित्रैःसमंद्विजः॥ पुरेतत्रप्रतिपदंवासस्थानमयाचयत्। न
लेभेवसतिंस्थातुंगेहेकस्मिन्नपिद्विजः॥ दर्शितंग्रामपाकेनविशाकंवाससमंदि
रं। प्रविश्यवसतिंचक्रेब्राह्मणःसंगिभिःसह। ततःप्रभातेविमलेसुनंदोसौद्विजो
त्तमः॥ बहिरालोकयांचक्रेवासगेहान्निजंवपुः॥ नाघ्रागानखिलान्प्राप्तान्यत्रका
पियदृच्छया। गम्यमानःसमायांतंग्रामपाकंददर्शसः॥ भागधेयवतांपुंसांपुण्यं
पुण्यवतामसि। प्रभावोविद्यतेविप्रकोपिलोकोत्तरस्त्वयि। कृपयातातःसहाया
स्तेकथंतत्वदनाहृद्वि॥ तत्पश्यमुनिशार्दूल कथयामितवाग्रतः॥ किंतुनान्यं
त्वयातुल्यंपश्यन्निहतपस्विनं। कंचनासिमहामंत्रंकांविद्यामवलंबसे
कस्यदेवस्यकारुण्यात्त्वल्लोकोत्तरावपि। तत्कारुण्यवशात्तिष्ठयोने
स्मिन्नन्वात्मनोत्तमा। शुश्रूषामखिलामेवभगवंस्तेकरोम्यहं॥ ॥१॥

गी॰मा॰ इति संचरयामास तस्मिन्नाश्रमे मुनीश्वरं परिचर्यां तस्यासौ भक्त्यानेकदिवानिशं द्वि
जेषु प्रयातेषु सहसा सुसमेयिवान् प्रातरागत्य तस्याग्रे रुरोद भृशदुःखितः अथ
४॰ मे भाग्यहीनस्य गुणवान्भक्तिमान्सुतः ऊर्ज्वल्यमानं दुपात्सक्षितो निशि रक्षसा
इत्येवं रक्षके नोक्ते तं पप्रच्छ स संयमी क्वास्ति स रक्षस्तापुत्रो भक्षितस्तत्कथं च न ग्राम
पाल उवाच वर्त्तते नगरे घोरः पुरुषादो निशाचरः सखादति नमानूयानान्नित्यं नग
रगोचरान् ससर्वैर्नागरैस्तत्र प्रापिताः पुरुषाः पुरा पौरानुः रक्ष राक्षस नः सर्वा
न्नग्रासं ते कल्पयामेह पथिकान्निशि निद्रितान्निर्वतान्भुंक्ष्व राक्षस एतस्मिन्नर
दूने पांथान्ग्रामपालैः प्रवेशयन् आहारं कल्पयांचक्रे आत्मीयप्राणगुप्तये भवान्न ४॰
णे॰ सौग्रहे मुषित्वैकस्त्वेः संगिभिः सह तेग्रस्तां किलवैनिकैः मुक्तोसित्वं द्विजोत्तम प्र

भावं भवन्तो वेत्ति भवानेव द्विजोत्तम ॥ मदीयतनयस्यापि स्थित्रमेकमुपागतं ॥ अजानता
मयासोपि तनयस्य प्रियः सखा ॥ अन्यैः पांथजनैः सार्धं तस्मिन्नो हे प्रवेशितः ॥ श्रुत्वा तत्र प्र
विष्टं तं निशीथे तनयो मम ॥ तमानेतुं गतः सोपि भक्षितस्तेन रक्षसा ॥ दुःखितो सो
पाप्य । तः प्रोक्तो सोपि पिशिताशनः ॥ ममापि दुष्टो पुत्रोसौ नेभवतानिशि भक्षितः ॥ भवज्ञ
द्वरान्निर्मुक्तः सुतोसौ येन जीवति । अस्ति चैव मुपायो हि ब्रूहि मे त्वं निशाचर । राक्षस उवा
च । अंतः प्रविष्टः तत्पुत्रमज्ञात्वाहमभक्षयं । आजन्मभक्षितैः पांथैः साद्धितो सौ सुतस्तव ।
तथा जीवति मे कुक्षौ यथा भवति रक्षितः । तथा विहितमप्यत्र दैवेन परमेष्ठि
ना । गीतैकादशमाध्यायं यः पठत्यनिशं द्विजः । तस्य प्रभावेन मे मुक्तिर्भवता
नां पुनरुद्भवं । ग्रामपाल उवाच । कथमेकादशाध्यायस्मामर्थ्यमीदृशवाद्भुतं ।
इति पृष्टो मया विप्र सर्वं मा वै निशाचरः ॥ राक्षस उवाच ॥ पुरा गृध्रेणा

नापिनभोमार्गेणगच्छता अस्थिखंडं चंचुदंडात्पातितं क्वापि वाहिणि। तत्क्ष
णाद्रायमागत्य कोपि ज्ञानी मुनीश्वरः। महातीर्थमिति ज्ञात्वा विदधेपि तत
र्पणं। तमब्रवीरजनाः सर्वे तीर्थमेतत्कथं वद मुनीश्वरः। जपत्येकादशाध्यायं
नियतं विजितेंद्रियः। कृत्वान्नाम विप्रोसौ चौरैर्व्यापादितः पथि। तस्या
स्थिशकलं गृध्रवदनात्पतितं तत्र के। तेन तीर्थमितं विप्रजातं पातकनाशनं
ततः स्नेमानवाः सर्वे सस्नुस्तत्र नैके शये। निःकल्मषास्तथा चैवं प्रापुस्ते
परमं पदं। एकादशस्य सामर्थ्यादध्यायस्य भविष्यति। मम। मा पि नुकेः
पंथानां पुनरुत्थानमद्भुतं। यो मया नु पुरा शीर्णो ब्राह्मणो त्रैव निष्ठति। ५२
चं. स एवैकादशाध्यायं जपेनैव निरंतरं। स तेनाध्यायमंत्रेण शीतवारा
भिमंत्रितं। विधाय पारिविप्रेंद्रु क्षिपे चाद्य ममोपरि। विप्र उवाच।।
तनामेशापनिर्मुक्तिर्भविष्यति न संशयः। इति तेनास्मि संदिष्टः समायातस्त्वदंतिकं।।

राक्षसः केन पापेन जातोसौ वद पूरुष। यः क्षपायां गृहे तस्मिन्नरानवा
दीति निद्रितान्। ग्रामपालः। अस्मिन्सोमपुरे कश्चि दासीद्विजः कृषी
वलः। एकदा शालिकेदार रक्षणे व्याकुलेंद्रियः। नातिदूरे समागध्रः हा
पांथमेकमभक्षयत्। तं विमोचयितुं दूराद्धावत्कोपि तावसः। भुक्त्वा
पांथं खगस्ता वनिर्गात् बक्षध्वना। स तावत्तापसः कोपात्तं बभाषे कृ
हा षीवलं। धिक्त्वां कौलिक दुष्टात्मान्कठोरमतिनिर्घृणे। कुक्षिंभरिपरि
त्राण विमुखं हतजीवितं। चौरैश्च दंष्ट्रिभिः सर्पैर्वह्निभिर्वाभिदृष्टिभिः।
गद्धराक्षि सभ्रूतैश्च वेतालादिभिरावृतान्। जनानुपेक्षते शक्तेस्त
द्दूदैस्य फलं भवेत्। न मो चयति ये विप्रं प्रभुभ्यो राक्षिभिर्हतं।। सया

तिनरकं घोरं स पुनर्जायते वृकः। निहन्यमानं विपिने गां व्याघ्रेणावीक्षि
तं। मुंच मुंचेति यो वक्ति स याति परमां गतिं। गवामर्थे हतो व्याघ्रैर्भि
ल्लैर्दुष्टैश्च राजभिः। ते प्रयान्ति पदं विष्णोर्दुःप्रापं योगिनामपि। अश्व
मेधसहस्राणि वाजपेयशतानि च। शरणागतसंत्राणकलां नार्ह
न्ति षोडशीं। दीनस्योपेक्षणं कृत्वा भीतस्य च शरीरिणः। पुण्यवा
नपि कालेन कुंभीपाकेन पच्यते। पश्यन्नपि भवान्यांथं दुष्टग्राहेण
भक्षितं। निवारणसमर्थोऽपि न चक्रे यन्निवारणं। निःकृपोसि
तिस्तस्माद्भविष्यति निशाचरः। इमं शापं मुनेः श्रुत्वा कंपमानकले ४३
वरः। प्रणम्य हालिको विप्रं बभाषे करुणं वचः। अज्ञात्वा क्षेत्ररक्षा
म्य

र्थं चिरं क्षिप्तेन चक्षुषा। न वेद्मि निकटे गावं हन्यमानं निरंतरं। तेन मेऽनुग्रहं कर्तुं कृपण
स्य त्वमर्हसि। विप्रः। यो वेत्येकादशाध्यायं जपेत्स तु दिने दिने। तेनाभिमंत्रितं वा
रि यदा शिरसि ताक्षैव। पतिष्यति तदा शापात्तव मुक्तिर्भविष्यति। इत्युक्तो मम शा
पान्तो हालिको राक्षसोऽभवत्। तदा गच्छ द्विजश्रेष्ठ तेनाध्यायेन मंत्रय। तीर्थोद
स्व कं स्वहस्तेन तस्य मूर्ध्नि विनिक्षिप। इति संप्रार्थितं तस्य श्रुत्वा करुणया श्रुतः॥ श्रीशिव
तथेति सह पाठेन मुनी रक्षोऽन्तिकं ययौ॥ एकादशेन तेनांबु विश्वरूपेणाभिमंत्रितं।
निक्षिप्तं तस्य शिरसि तेन विप्रेण योगिना। गीताध्यायप्रभावेण शापमोक्षमु
पाययौ। ततः पथि कृते तेन विमोक्षणमवाप सः। विहाय राक्षसं देहं चतुर्बाहु
स्ततोऽभवत्। निगीर्णा ये जनास्तेन राक्षसेन सहस्रशः। चतुर्भुजा बभूवुस्ते
शंखचक्रगदाधराः ते विमानं समारुह्य सार्द्धं वै सरराक्षसं। मदीयस्तं न
ना

यःस्त्वं दर्शयस्वनिशाचरं। इत्युक्ते ग्रामपालेन दिव्यश्रीबाहुराक्षसः। एवं चतुर्भुजं
विद्युत्तमालस्यामकच्छविं। माणिक्यदिव्यमुकुटं मणिकुंडलमंडितं। मुक्ताफला
हारं महास्कंधं स्वर्णकेयूरभूषितं। राजीवलोचनं स्निग्धतारावक्त्रसरोरुहं। दिव्यं
विमानमारूढं देवत्वं प्राप्तमात्मजं। इति तस्य वचः श्रुत्वा सुतं दृष्ट्वा तु तादृशं। स्वगे
हेनेतुमारेभे तं जहास सुतस्तदा। कति वाराणि जातोसि त्वं पुत्रो मम रक्षक। पूर्वं
पुत्ररूपवदीयोस्मि अधुना विबुधोह्यहं। यास्याभिवैरूवंधाम ब्राह्मणस्य प्र
सादतः। निशाचरोपि प्राप्तोयं पश्य देहं चतुर्भुजं। एकादशस्य माहात्म्याद्या ५८
तिस्वर्गस्समं जनैः। विप्रादस्मात्त्वमध्यायमध्यस्यैष्टं जपानिशं। भविष्य
तिन संदेहस्तवापि गतिरादृशी। इत्युक्ता तेततः सर्वेप्रापुर्विष्णोःपरंपदं। ०

द्वा नमध्यैयंततो विप्रा ग्रामपालःपपाठसः। नावुभौतस्य माहात्म्याज्जग्मतुर्वैष्णवं पदं।
इत्येकादशमाहात्म्यकथा तुभ्यं निरोपिता। एतस्य श्रवणाच्छुभमहापातकनाशनं॥
॥ ॥ इति श्रीपद्मपुराणे गीतामहात्म्ये सतीश्वरसंवादे एकादशोध्यायः॥ ॥
श्रीशंभुरुवाच॥ अस्ति कोल्हापुरं नाम नगरं दक्षिणापथे। सुखानां सदनं सिद्धसा
धूनां सिद्धिसंभवं। पराशक्तिपरं पीठं सर्वशक्तिनिषेवितं। पुराणे सुप्रसिद्धं यत्
भुक्तिमुक्तिफलप्रदं। कोटिशस्तत्र तीर्थानि शिवलिंगानि कोटिशः। आस्ते रुद्रगयायत्र वि
प्रं श्रुता पृथिवीतले। तुंगोच्चसुमहावर्णगोपुरोल्लसितोरणं। प्रासादशिखरोरा[illegible]ग्र्यंतं त्रं
गच्छकनकध्वजं। सोमकांतमहासौधवलभिपंक्तिशोभितं। जालमार्गज्वलद्धूप
प्रमोदितदिगंतरं। चलत्पताकविस्तीर्णं महादेवालयान्वितं। चत्वरैः सुंदरैः स्निग्धैः
श्रीमद्भिः शुभ्रमानसैः। अधिष्ठितं सदाचारैः पुरुषैर्धर्मभूषणैः॥ कुरंगनय

ना: श्यामास्तन्वंग्य: कुटिलालका: उत्फुल्लपंकजछाया: पीनोत्तुंगपयोधरा: कृशमध्यानिम्न
नाभिवलित्रयविशोभिता: विशालजघनाश्चारुजंघायुग्मवरांगका: वाचालमेखलादामभि
निक्वणन्मणिनूपुरा:॥ रणत्कंकणहस्ताब्जा: स्फुरत्स्फटिककंजरत्नमय:। वसतिप्रमदायत्रो
न्मादयंत्यामुनीनपि। समस्तवस्तुसंयुक्तं सर्वभोगसमन्वितं। मंगकेसकलेर्युक्तंमहाल
क्ष्म्यानिषेवितं। तत्रागछत्सुमान्कश्चिद्युवागौर: सुलोचन:। कंबुकंठ: पृथुस्कंधो
महावक्षामहाभुज:॥ समस्तलक्षणोपेतोगौर: सर्वांगसुंदर:। प्रविश्यनगरेपश्य
न्शोभांसौधेषुसर्वत:। उत्कंठितमनाद्रष्टुंमहालक्ष्मींसुरेश्वरीं। मणिकुंडेकृतस्ना
ल न: संपाद्यपितृतर्पणं। नमांलक्ष्मींमहामायांनत्वातुष्टाभवंस्थित:। जयत्सपार ४५
कारुण्याशरण्याजगदंबिका। कुर्वाणाजगतोजन्मपालनंक्षपणं दृशा॥ ॥

यपाशक्त्यासमादिष्ट: परमेष्ठीसृजत्सृजन्॥ अवत्सृज्ययथाशक्त्यापालयत्यच्यु
तोजगत्। यथाशक्त्यासृताचेन्द्र: संहरत्यखिलंहर:॥ तांभजेपरमांशक्तिंजन्मस्थि
तिलयोज्झितां। योगिध्येयांघ्रिकमलेकमलेकमलालये। स्वभावादवितीर्णत्वं
गृह्णासीद्रियगोचरान्। त्वमेवकल्पनाजातानकल्प्यंकुरुतेमन:॥ इच्छाज्ञानक्रिया
रूपापरसंवित्स्वरूपिणी। निष्कलानिर्मलानित्यानिराकारानिरंजना। निरंतरा
नियंतकानिरालंबानिरंकुशा। त्वमंबमहिमानंतेकोवर्णयितुमीहते। वंदेनिर्भिन्न
षट्चक्रांसहस्रांतविहारिणीं। अनाहतध्वनिमयीं बिंदुनादकलात्मिकां। मातं
स्त्वांपूर्णशीतांशुमार्गकांत्यापीयूषवाहिनीं। पुष्कलासिवत्सकेवाकांसनकादीन्दिरं
वरान्। अनुस्युताशिवासंविज्जाग्रत्स्वप्नसुषुप्तिषु। तुरीयावर्तमानायांदृश्या
स्तनतसंतिषु। ददासिप्राणिनांसर्वांस्थितत्वंब्रह्मसंपद:॥ संहृत्यतेषुसं

वाराही त्वं महालक्ष्मी नारसिंही त्वमंबिके ॥

गी॰म॰ घातत्तुरीयातीतयालया। योगिनां बिंबतादात्म्यं दीयते निर्विकल्पया॥ परां
नमामि पश्यंतीं मध्यमां वैखरीमपि। रूपाणि देवि गृह्णासि जगत्संत्राणहेत
४६ वे। त्वं ब्राह्मी वैष्णवी त्वं च माहेशी च त्वमंबिका। त्वं कौमारी चंडिका च लक्ष्मीस्त्वं
चापि पार्वती। सावित्री त्वं जगन्माता त्वं शिवा त्वं च रोहिणी। संज्ञा स्वाहा स्वधा त्वं हि वसु
धा परमेश्वरी। चंडमुंडभुजादंडस्फुरद्दोर्दंडविक्रमे। रक्तबीजगलद्रक्तपानपूरितकोष्ठके उ
न्मत्तमहिषग्रीवान्मीलक्रोडदोर्युगे। शुंभासुरमहादैत्य दारणायातवैभवे। अनंतचरि
ते तुभ्यं नमस्त्रैलोक्यमातः के। भक्तकल्पलते मह्यं प्रसीद परमेश्वरि। इति तेन तदा
देवी महालक्ष्मीस्तुता सती। निजरूपं समास्थाय पुरुषं प्रत्युवाच ह। राजपुत्र प्रस
न्नाहं वृणीष्व वरमीप्सितं पुरुषउवाच। पिता मे धरणीपालो वाजिमेधं महाक्र ४६
तुं। कुर्वाणो देवयोगेन रोगाक्रांतो दिवं ययौ। तद्वपुस्तिलतैलेन शोषयित्वा

मया ततः। स्थापितस्तत्र योगोसौ यथापूर्वमवर्तत। अथाक्रांतमहाक्रो
धपेयागेतुरंगमः। निरीथे बंधनं हित्वा नीतः केनापि कुत्रचित्। अ
दृष्ट्वा तत्प्रतीवापि निवृत्तेषु जनेष्वहं। आगमं त्वत्कृते विवः सर्वानुसरणं वा मुपा
गतः। प्रसन्नायदि देवि त्वं तन्मे योगतुरंगमः। दृश्यो भवतु योगो सो संपूर्णो
प्यतेयथा। आनण्यं मम तातस्य तेन राज्ञो भविष्यति। यथा कुरु जग ते
द्धात्रीशरणागतवत्सले। महालक्ष्मीरुवाच। यमद्वारे हजः सिद्धिसमा
धिरिति विश्रुतः। समाजयास्ते तु मुनिं सर्वाणि व्यापयत्यतिः। इत्युक्तः स म
हालक्ष्मीं ततो राजकुमारकः। आजगाम मुनिः सिद्धः समाधिर्यत्र तिष्ठति॥
प्रणम्य तस्य पादाब्जं कृतांजलिरवस्थितः। तमुवाच ततो विप्रः प्रहितोसि
त्वं वयम्। वदाप्यमन्महे सर्वं सत्यवादि भवको कय। इत्युक्त्वा त्रिदशा
न्सर्वानाचकर्ष समंचकः। ऐक्षत क्षितिपालस्य तनयोसौ तदासुरान्॥

गी॰टी॰

४८

रा

कर्तांतर्हिपुरंदेरात् वेपमानकलेवरात्। अथतानमरान्सर्वान्सबभाषेद्विजोत्तमः
अमुष्यराजपुत्रस्यवाजिमेधायकल्पितः। नीतोस्तिदेवराजेनमायमीहयपद्धयस्सः।।
गीर्वाणास्त्वयमेवाद्यसमानयतमाचिरं। अथातस्यमुनेर्वाक्याद्देवैर्यज्ञतुरंगमः।। स
मर्पितस्ततस्तेनतेनुज्ञाताद्दिवौकसः।। आहूतानमरान्दृष्ट्वागतंलब्ध्वातुरंगमं।।
महीपतिस्ततोनत्वातंमुनिंवाक्यमब्रवीत्। आश्चर्यमिदमेतन्नेसामर्थ्यमीषसत्त
मकृपयामेकृतंयत्तत्रिदशाकर्षणंक्षणात्। हहहाकृष्यदत्तोमयत्नियोयंतु
रंगमः।। नास्तिकिंयदपरंयाचेदुष्करंयत्सुरैरपि। प्रभाविष्यतितत्कौतुभवानेवनचा
परः।। शृणुविप्रमहीपाकौपितासीन्मेहृदयः।। आरब्धेहयमेधेचासौदे
वेननिधनंगतः। अथाद्याप्यस्यदेहोस्तितैलेनशोषितः।। तस्यसं ४८
जीवनंभूपःकर्तुमर्हसिसत्तम। इत्याकर्ण्यस्मितंकृत्वासजगादमहा
मुनिः।। यामिस्तत्रपतितायत्रतावकोयागमंडपे। अथागत्यसमंतेन

तत्रासिद्धसमाधिना। पयोपिमंत्रानिद्धेनस्पृष्टेतस्यमूर्धनि। ततःप्रापन्नृपःसंज्ञांसमुत्तस्थौ स।।शा
यदद्दर्शतं। सतंवप्रच्छविप्रेंद्रकोसिधर्मोत्तिभूपतिः।। ततोराजसुतःसर्वंभूपायकायन्य
वेदयत्। सनत्वाब्राह्मणंयज्ञात्तंपुनर्दत्तजीवितं। बभाषेकेनपुण्येनत्वयिशक्ति
रलौकिकी। यथामेजीवितंदत्तंमाकृष्टाश्चदिवौकसः। योगेभ्योविहितोविप्रएवमेतं
निरूपय। इत्युक्तस्तेनविप्रोसौजगादश्लक्ष्णयागिरा। गीतायाद्वादशाध्यायजप
माहमतंद्रितः।। तेनशक्तिरियंराजन्ययाप्राप्तोसिजीवितं। एतदाकर्ण्यराजासौ
द्वादशाध्यायमुत्तमं। पपाठतस्माद्विप्रर्षेःसकाशाच्छ्लक्ष्णान्वितः।। तस्याध्याय
स्यमाहात्म्यात्तेसर्वेसद्गतिंगताः।। ।। ।। इतिश्रीपद्मपुराणेगीतामाहात्म्ये
सतीश्वरसंवादेद्वादशोध्यायः१२।। ।।छ।। श्रीदेव्युवाच।। ।। द्वादशाध्या
यमाहात्म्यंभवताकथितंमम।। ब्रूहित्रयोदशाध्यायमाहात्म्यमपिसुं
दर।। ईश्वरः।।- शृणुत्रयोदशाध्यायमहिमानंभोनिधिं शिवे।। यदाकर्ण

गी०मा
४९

नमात्रेण प्राज्ञं मुदमवाप्स्यसि ॥ अस्ति दक्षिणदिग्भागे तुंगभद्रा महानदी ॥ तत्तटे
नगरं रम्यं नाम्ना हरिहरपुरं । यत्रास्ते भगवान्देवो हरिहरः स्वयं । यस्य दर्शनमात्रेण परं
कल्याणमुच्यते । तस्मिन्पुरे [illegible]न्नामासीद्द्विजः दीक्षितसंज्ञितः तपःस्वाध्यायनिरते श्रोत्रि
यो वेदपारगः ॥ दुराचारेति तस्यासीद्भार्या नाम्ना च कर्मणा । न सुखापसमेयस्याकुलालो
पाकथं च न । स्वयमप्यात्मसदनेन वा स्वैरचारिणी कंठदघ्नं द्विजद्वारे धयंती वारु
णीरसं । पतिसंबंधिनः स्वीतर्जयंती पुनः पुनः ॥ विटैः सह सहोन्मत्ता रममाणा निरंतरं
कदाचिद्व्याकुलाद्दृष्टा पुरपौरैरितस्ततः संकेतगेहमकरोत्कांतारे निर्जने स्वयं ॥ अथ त
त्रैव सा पापा रममाणा विटैः सह ॥ निनाय सा बहून्कालान्निजयौवनगर्विता ॥
अथांतरे पुरे तस्मिन्वसती सा निरंकुशा ॥ वसंतकाले संप्राप्ते स्मरचित्ता ब[illegible]
यद्रह आमकपक्ववाकीर्णा सहकारविहारिणी पिकानां पंचमालापैः पुनः संजी ४९
वितस्मरा । स्फुरच्चंपकसौरभ्यहारकैर्मलयानिलैः । मंदमंदंप्रसर्प[illegible]

रांदोलितवरद्रुमैः उत्फुल्लमल्लिकामोदमदिरापारणावती अलीनां कल
झंकारैः समंताद्राव शोभिते । प्रसन्नवारिभिः स्मेरसरोवरसुगंधिभिः
मिलन्मरालनिवहैः सरोभिः प्रकटीकृता घनच्छायासुखासीनहरिणार्भ
कधारिभिः नीरंध्रपल्लवैर्नानाशाखिभिः शोभिनावनिः तस्मिन्वसं
तसमये मुदितासाभिसारिका अपश्यज्जगदानंददायिनीं चंद्रिकां नि
शि चंचच्चकोरचंचूच्चपीयूषासीकरांतरां इवादिक्कपालीयसुधानि
र्भरानिर्भरां विकाशिकुसुमक्रोडक्रीडीभूतकरोत्करां उल्लासितपया
राशिकल्लोलितनगतांबरां मनोभवमहासिंहकुंजकंटककर्कशां घनां

गी·भा· धकारसंदोहविदारणपटीयसी श्रांतीकृतवशीकारपरार्थ्यहिमगर्भिणी म्लान
५९ पंकजसंकोचशासनामानंददायिनी चक्रवाकवधूचक्रकरुणाकोशसाक्षिणी मु
क्ताश्रेणीविशुद्धहारप्रभासितदिगंतरा अथतस्यांप्रभूतायांपूरयंत्यांदिशा
दृशा कदाचित्कामिनीसातुपथिसौधविहारिणी अपश्यंतीविटानरा
त्रौनाभिंद्यभवनार्गला यथौसंकेतभवनंनिर्गत्यनगराद्बहिः तत्रप्रिय
तमंकंचित्कामसंमोहितमानसा अन्वेषयतीनाद्राक्षीत्कुंजेकुंजेतरौतरौ
आकर्णयंतीकांतस्यमंदालापान्पदेपदे अभियातिततःकोऽन्यत्रनिस्व ५९
नसंचरः चक्रवाकरवानेव कलौकांतालापस्यमाद्यसौ सरोवराणिसर्वा
णिपर्यटंतीमुकुर्मुकुः कांतभ्रांत्यानरोर्मूलेप्रसक्तंहरिणोत्करं प्रबोध

यंतीसोऽब्रुवासा आगतास्मीतिभाषिणी आलिंगतिवनेजंतून्जीवितेश्वरशंकया त
दाननश्रमाद्भूयश्चुंबंतीविकचांबुजं तत्रतत्रकृतव्यर्थश्रमाहंसप्रियास्वयं विलला
पवनेतस्मिन्मूर्छितापिविविधोक्तिभिः हाकांतहागुणाकांतहाविजीवस्यनायक
हेमनोहरसौभाग्यभाग्यलावण्यशेवधे हापूर्णचंद्रवदनहासेराजायतेक्षण हा
कांतनत्वमसादिस्वविश्रामार्थस्मरद्रुम अहोकांततवाकीर्णकर्णकुंडलदीधितिः
नयनानंदनिस्यांदिकुचंतेमुखचंद्रमाः यदिकोपेनकुत्रापिगुप्तवेषोऽत्रतिष्ठसि
आसादयामित्वांकांतदत्त्वाप्राणान्नवोचिका इत्युच्चैःसर्वतोदृश्याविलपंत्याप्रि
योगतः तस्याःश्रुत्वावचःकोपिसुप्तोव्याघ्रःप्रबुद्धवान् कुर्वन्घुरुघुरुध्वान
पश्यन्नतिदिशांरुषा आस्फालयन्नखैर्भूमिं गर्जन्नाकाशगह्वरं इत्थंनि
मग्नलांगूलःपुनःपुनःसायकंतवान् ततोव्याघ्रःसमुत्पत्यत्रास्तेस्माभिसा
रिका अथसापिसमापांतमालोक्यपतिशंकया निर्जगामातुरास्थानम्

गी·म मनिर्भरमानसा ततस्तस्य नरवक्रोऽङ्कुरत्नांधीकृता सती जहौ प्रियवपुः शंकां
५० कृत्वा गर्जितमूर्जितं व्याघ्रोपिपातयामास ततो नखशिलीमुखैः तांमुक्तशो
कांक्रोशंतीं हृतगद्गदया गिरा तथाविधापि सा नारी भ्रांतिमुत्सृज्य सत्वरं कृतां
जलिरुवाच का व्याघ्रमूरेभिसारिका व्याघ्रत्वं तु कुतो हेतोर्मां निहंतुमुपाग
तः इदं पूर्वं समाख्याय पश्चात्त्वं हंतुमर्हसि इति तस्या वचः श्रुत्वा शार्दूलखंड
विक्रमः क्षणं विहाय तद्ग्रासमुवाच प्रहसन्निव मलापहा नदी नाम्ना देशे
तिष्ठति दक्षिणे नगरी मुनिपूर्णा तितस्या रोधसि वर्त्तते तत्रास्ते भगवान्
साक्षात्पंचलिंगो महेश्वरः तस्यां पुर्यामहं विप्रपुत्रोभूवं तथास्थितः अयाज्या ५०
न्याजयन्नश्नन्नकोऽहिष्टनदीत टे वेदपाठफलं शश्वद्विक्रीणानो धनकां
क्षया भिक्षुकान्परान्लोकान्नितिरस्कुर्वन्नुक्तिभिः प्रगट्य प्राविणग्र ज्ञा
नूनदत्तमानिशं मया छलयन्सकलान्लोकान्सणग्रहणकौतुकात्

ततः कतिपयैः कालैर्जरठत्वमुपेयिवान् वलीपलितवानंधः प्रपतन्प्रस्खलन्गतिः
पतद्दंतोभवं भूयः प्रतिग्रहपरायणः हस्तेन गृहीत दर्भोहमगमं तीर्थसन्निधौ ध
नग्रहणलोभेन भ्रमन्पर्वस्कपर्वसु ततोहं शिथिलांगः सन्किंचिद्दक्षिणिनिरालयः
गतवान्यावितुं भोक्तुं देशमध्ये पुरः शुना अपतन्मूर्छितो भ्रत्वा ततः क्षितितले त
क्षणं ततोहं गलितप्राणो व्याघ्रयोनिमुपागतः अत्र तिष्ठामि कांतारे पूर्वपाप
मनुस्मरन् न भक्षयामि धर्मिष्ठान् संतः साधूञ्जनान्सतीः किंतु पापान्दुराचा
रान्सतीर्भक्षयाम्यहं अतो सतीत्वं तत्त्वेन मम नैवेकवलायते इत्युक्त्वा स्वैर्नखैः
क्रूरैस्तां विभज्याग खंडशः अस्यर्थपीडितानेन व्याघ्रेण त्वबलीयसा अथ तां भ
क्षितां तेन पापदेहमुपार्जितां यमस्य किंकरा निन्युः सद्यः संयमिनीपुरीं य
मादेशेन तत्रापि तज्ज्ञया मास्तुरा श्रुता विण्मूत्ररक्तकुंडेषु घोरकुंडेषु नेकधा

गी॰मा कल्पकोटिषु यातास्ततस्मादादाय तां मुद्गरैर्वेश्यापयामास समनंतरसमाव
धि ततो व्याकृष्यतां दीनां रुदंती सर्वतोमुखी मुक्तकेशा भग्नगात्रा चिरक्षिपुट
५१ दनानिले एवमादिपरां घोरां भुक्त्वा नरकयातनां इह जाता महापापा पुनः
श्वपचयोनिषु ततः श्वपचगेहेपि वर्धमाना दिने दिने पूर्वजन्मवशेनैव तु थे
वासीद्यथापुरा ततः कतिपये काले पुनः स्वभवनं ययौ यत्रास्ते प्रभया दे
वीपुरस्यांतःपुरे स्फुरैः तत्रापश्यद्द्विजन्मानं वासुदेवाभिधं शुचिं गीतायां
दशाध्यायमुच्चैः पठंतमनारतं ततस्तच्छ्रवणाद्देवमुक्ता श्वपचविग्रहात् दि
व्यं देहं समासाद्य जगाम त्रिदशालयं इति श्रीपद्मपुराणे गीतामहात्
म्ये सतीश्वरसंवादे त्रयोदशोध्यायः ईश्वरः अतः परं प्रवक्ष्यामि भवा ५१
नि भवमुक्तये गीताचतुर्दशाध्यायमवधारय सादरं महेन्द्याः कुंडलस्कुल

मस्ति काश्मीरमंडलं राजधानी सरस्वत्या भगवत्या मनोहरा यामधिष्ठाय वा
ग्देवी ब्रह्मलोकं न गच्छति हंसेरारुह्यमानापि साक्षित्वे प्रस्तितेरपि सरस्वतीपा
दपद्मसेवायोग्यैः स्वकुंकुमैः यत्र गौरयत्याशा हंसपक्षपुटोद्भवैः निरंतरतया
यत्र नृणां संस्कृतभाषिणां सुपर्वाणामयी भाषा निर्विशेषोपलभ्यते महत्व
महत्तां गणोद्धूतैर्यत्र कुंकुमपांसुभिः सर्वतो रूषितच्छायं तारांशकरविमंडलं तत्रा
सीत्तेजसां राशिः शौर्यवर्मा नरेश्वरः उद्यदुज्ज्वलबाणौघखंडिताराति मंड
लः आस्तसिंहलद्वीपे राजा सिंहपराक्रमः नाम्ना विक्रमवेताल कलाना
मपि शेवधिः उभौ परस्परं मैत्रीं वर्धयांचक्रतुः क्रमात् तत्र देशे समुत्पन्नैरपू
र्वैः प्रभवोत्करैः एकदा प्रहितं प्रेम्णा प्राभृतं शौर्यवर्मणा राज्ञा विक्रमवता

गीता· लोविलोक्यशुनकीद्वयं मत्तमातंगयुगलं मणिभूषणचामरं प्रेषयामासमित्रा
५२ यप्रभूतंशौर्यवर्मणे एकदाशिबिकारूढं चारुचामरराजितं सुवर्णशृंखला
रूढं वाद्यडिंडिमडंबरं शुनीयुगलमादायमृगयाकौतुकोत्सुकः राजाजगाम
बाह्यालिंसमंराजकुमारकैः पणबंधविधानेन समुत्थितः शशावकः तत्रराजकु
माराणांमहान्कोलाहलोऽभवत् ततःसमानवयसाकेनचिद्राजसूनुना बद्धमौ
ल्यंपणंकृत्वाराजारिरंसुःकौतुकी ततोवतीर्दोलायाबिरुदावलिगर्जितं धावंतं
शशकस्याबैःएतेनुवन्नृपःशुनीं मुमोच × मं × राजपुत्रोपिप्रेमपात्रंमहाभुजः
विररामशुनीमुच्चैःसंकीर्त्यबिरुदावलिं अलक्ष्यमाणावेगोस्मिन्शुनीयुगलके ५२
भृशं धावन्कोपितमेवास्तीत्पश्यतांगोचरोरजः पपातगर्त्तेमहतितत्रान्धाकोति

श्रमादसौ पतितोपिशुनीवश्योनाभूच्छशकशावकः ततःशनैःसमुत्थायधावन्धा
क्रमरोषितः जगदेराजशुन्यासोशशकःफेनमुद्वहन् ततःकथंचिदुत्पत्यगच्छन्वि
कलयन्दिशाः राजपुत्रशुनक्यासौगृहीतःकंधरातले जितमस्माभिरत्यर्थमि
तिसंजल्पतांनृणां कोलाहलेशंकितायाःशुन्यानिर्यातवान्मुखात् ततोदंष्ट्र
व्रणश्रेणीक्षरद्रुधिरधारया कापिमर्मरभूभागेनिलीयस्थितवान्शशः जि
घ्रंस्याराजशुन्यासौभूभागंघनरोषया दृश्यमानःपरित्रस्तोहस्तमात्रंततो
गमत् तत्रकर्पूरकदलीक्रोडव्याघ्रद्रवीतलः चोलीकपोलफलकान्अंबुधा
रिसमीरणः डक्कनकेतकीकोशजोरेणुकुलितेक्षणः विस्रब्धाहरिणायत्र
छायांतंपरितन्वता नालिकेरफलैर्यत्रस्वयंनिपतितोरसः अपिकेसरि

गी·म· णोयत्रखेलंतिकलभैःसमं अपिपूतफलैःपक्वैस्तृप्ताःशशाश्चमृगाअपि यत्र
५३ खेलंतिकलभैःसमंचफणिनस्तथा केकीबर्हेषुनिर्विश्यनिर्विशंकंविशंतिहि
यत्राश्रमांतरेविप्रोवत्सनामाजितेंद्रियः चतुर्दशमध्यायंजपन्नास्तेनिरंतरं
तत्रतच्छिष्यपादाब्जप्रक्षालनकृतेजले कर्दमेनिपतद्दृत्वाजीवशेषोमृतःश्वस
न् ततःकर्दमसंस्पर्शमात्रान्निर्वाणसंस्थितिः दिव्यंविमानमारुह्यनिर्ययौशशकोदि
दिवं ततःशुनीविलित्तांगीलोकैःकर्दमबिंदुभिः क्षुत्पिपासार्त्तिरहितानारीरू
पंविधायसा ततोदिव्यांगनावृंदगंधर्वैरुपशोभितं दिव्यंविमानमारुह्यसा
न्यापत्रिदिवंययौ ततोऽजहासमेधावीशिष्योनाम्नास्वकंधरः विचार्यविस्मि ५३
तःपूर्वजन्मवैरस्यकारणं राजापिपर्यपृच्छत्तंस्मयस्मेरविलोचनः प्रणम्य

परयाभक्त्याविनयैकपयोनिधिः राजोवाच कथंकथयमेविप्रहीनयोनिनि
षेवितो अतोयज्जग्मतुःस्वर्गंशुनीशशकशावकौ शिष्यः वत्सनामाद्विज
मास्तेवनेमुनिर्जितेंद्रियः चतुर्दशमध्यायंगीतायाःसर्वदाजपन् शिष्यो
हंतस्यसत्पालब्रह्मविद्याविशारदः चतुर्दशमध्यायंजपामिप्रत्यहंनृप
यदीयचरणांभोजप्रक्षालनजलेकृतेन् शशाश्चिद्दिवमापन्नोशुनक्यास
हसमपि राजोवाच हेतुनाकेनहसितंकथयत्वांद्विजोत्तम अतःकिमपित्ता
कृतंमन्यमानेनसादरं शिष्यः महापराष्ट्रेनगरेनाम्नाप्रत्यंडुकंमहत्
तत्रासीद्ब्राह्मणोनामकेशवःकितवाग्रणीः विलोभाद्भवत्तस्यजायास्वै
रविहारिणी तेनसाहिंसिताक्रोधाद्वैरसंस्मृत्यजन्मनः ततस्त्रीवधपापेन

गी·मा· ॥ राजाकोजायतद्विजः किल्बिषाद्धुनकीसापिजाताचेपूर्वजन्मनः पूर्वेणजन्म
५४ नाभ्यस्मात्तरंविस्मरतोनाहि भा सोदिवभ्यांबहुधायोन्यंतरमपिकंचित् ६
साकर्ण्यस्वभूपालः सकलंश्रद्धयान्वितः गीतामभ्यस्य सकलामवापपरमां
गतिं इतिश्रीपद्मपुराणेगीतामाहात्म्येसतीश्वरसंवादेचतुर्दशोध्यायः
श्रीः ॥ ईश्वरउवाच प्रवक्ष्यामिविशालाक्षितुहिनाचलकन्यके गी
तापंचदशाध्यायमाहात्म्यमवधारय कृपाणनरसिंहोभून्नाम्नागौडेषु
भूपतिः यस्यासीद्द्वारयासंख्यदेवाःसंध्यावलीकृताः यदीयमत्तमातंगदान
धाराजलैरपिव निदाघेपिनसेवेतरवेःसंतापवेदनां संक्रंदनात्परित्रस्ता ५४
यदीयशरणंगताः द्विजैरेकाभ्योमन्नाश्चलंतःपर्वताइव मत्तमातंगचिक्का

रघस्वनानामिवाद्रात् यस्यगोपायितुंशैलाःव्याहरंतिकृपावतः यदीयधावत्तु
रंगखुरसंघातगर्जनां नाभूद्विभक्कथंकारंगतखंडधरातलं यस्मिन्नवक्रूतामित्रेस
मुद्धरतिमेदिनी पुनःसमुत्सयांचक्रेमहाभाष्यंफणीश्वरः तस्यासीत्सैनिकोधी
मान्शास्त्रशास्त्रकलानिधिः नाम्नाशरभभेरुंडःप्रचंडभुजमंडलः भांडागारे
णतुरगैर्भटैर्वीरसहस्रकैः समानयत्वभमत्तुंडुगौडुम्मंडुगर्गामडुगैः सक
दाचित्वयंराज्यंकर्तुंपापृद्धोमनः निहत्यवस्कधापालंबलात्तांककुमारकेः
कृतसाहस्याद्दिवसैःस्वस्थैश्चिस्थांचिकीर्षया विषूचिकामयाद्दाशुपरासुःस
मजायत कालेनात्मीयसाघेत्यपापात्मातेनकर्मणा तेजस्वीतुरगोजा
तःसिंधुदेशाकृशोदरः मोल्येनबहुनाक्रीत्यहृयतत्वविदाततः बलय

गी. न्नवतानीतः केनचिद्वैश्यसूनुना ज्ञातपूर्वो राज्ञे वैश्यः प्रतिहारेण दर्शितः
५५ किमप्यपूर्वं राज्ञोतिपृष्टे स्म भाषत देवाविज्ञागतं रत्नमिति मत्वा तुरंगमः म
यानीयत मौल्येन बहुधा हेमा फलक्षणः ततो विलोक्य चक्राणि भूपालः पार्श्व
वर्त्तिनां समादिदेश वाजिजमश्वोत्रानीयतामिति शिरांसि कम्पयन्तृणाम
श्वलक्षणवेदिनां शूराणामथ चेतांसि बहुलाहयन्नपि लालाफेनच्छलेना
सौवमकुरितस्य यशः अखण्डमेदिनीवेगबहुसंक्रमणार्जितं उच्चैःश्रवस्तु
त्यां मेने गुणसाम्येन नन्वते विरूपवानिति तेजस्वी श्रीजवान्नतकंधरः
चामरैरिंदुधवलैर्वीज्यमानो निरंतरं दुग्धांभोनिधिलोलैः स्वैरवातैरि
श्रेश्रवाइव नीलातपत्रयुगुलं घनच्छायामयाश्रियं बिभ्राणं वारिदाली ५५

ढतिमाद्रिशिखरश्रियं मेदिनीमंडपस्पर्शसंक्रांतमिवपातकं मुहुर्हर
यन्धून्वन्नवबंधुरकंधरा हतं हेषारवेण गुरुणा दिशां प्रख्यापयन्यशः सत्व
स्य राशिरितस्ततो वेगतीनामिव शावधिः आनीतो वाणिजा वाजी राज्ञा समप
श्यत बहुधा वर्णितो मान्यैरश्वलक्षणवादिभिः अथेत्थं वाणिजे दीर्घं स्वर्णं
दत्वा महीपतिः जयाह तुरगं वेगादासीदानंदनिर्भरः ततोश्वपालमाहूय
न्नतस्तं निरूप्य च विसर्जितसभालोको गृहान्तरमगान्नृपः अनेकधा समा
हूतं महीपालो रणांगणे पास्वत्रणकिणश्रेणीभूषणं सत्वसन्निधिः एक
दा मृगयां खेलन् कुतूहलरसोन्मनाः तमारुह्य महीपालो ह्यरत्नं वनं गतः
विसृज्य सैनिकान् दूरे धावतः परितोखिलान् आकृष्यमाणो हरिणे पिपा

साकुलिभवत् तत उत्तीर्य तुरगाज्जलमन्वेषयन्नृपः बध्वा च तरुशाखाया
मारुरोह शिलातले गीतापंचदशाध्यायश्लोकार्धं लिखितं नृपः पातितं मर्क
टात्तत्र पत्रखंडमलोकयत् पत्रं वाचयतो राज्ञः श्रुत्वा गीताक्षरावलिं ततो मु
क्तिपदं लेभे तुरगस्त्वरयापतत् ततोऽयं थिं समासाद्य पल्याणमपसार्य च उ
त्थाप्यमानस्तुरगो राज्ञा नोत्थितवान्पुनः ततः शरभभेरुंडो नृपमाभाष्य स
त्वरं दिव्यं विमानमारुह्य जगाम त्रिदिवालयं द्राक्षेक्षुवाटिकापूगनागके
सरपुंगवैः खेलत्कलभसारंगनृत्यत्केकिकुलं नृपः ततो गिरिं समारुह्य ददर्शा
श्रममुत्तमं पुन्नागकदलीचूतनालिकेरसमन्वितं प्रणिपत्य द्विजन्मानमपृ
च्छदभ्यंतरस्थितं पप्रच्छ परया भक्त्या मुक्तस्य गामकारणः राजोवाच तुरंगो

निरगात्स्वर्गे हेतुनाकेन मे वद इत्याकर्ण्य वचो राज्ञो द्विजन्मा वाचमूचिवान्
आसीत्सेनापतिः पूर्वं भेरुंडस्तव भूपते त्वां निहत्य समं पुत्रैः कर्तुं राज्यं समुद्यतः
ततो विषूचिकारोगात्कालधर्ममवाप सः कालेन बहुना प्रेत्य तस्यापात्तुरगो भव
त् अथ पंचदशाध्यायश्लोकार्धं लिखितं क्वचित् तत्त्वया वाचितं श्रुत्वा निरगा
त्तुरगो दिवं ततः समागतैस्तत्र परिवारजनैर्वृतः प्रणिपत्य द्विजन्मानं हृष्टो रा
जाश्रमान्निर्गतः पत्रं तद्वाचलिखितं गीतापंचदशाक्षरं वाचयन्स महीपालो हर्ष
संफुल्ललोचनः अभिषिच्य निजं पुत्रं मंत्रिभिस्त्रिभिः सह सिंहासने सिंहबलो
मुक्तपापविशुद्धधीः इति श्रीपद्मपुराणे गीतामाहात्म्ये सतीश्वरसंवादे पं
चदशोध्यायः ईश्वरः अतःपरं प्रवक्ष्यामि षोडशाध्यायगौरवं आक
र्णय कुरंगाक्षि हर्षोत्कर्षप्रवर्धिनि अस्ति सौराष्ट्रकं नाम्ना पुरं गुर्जरमंडले

गी॰म॰ तत्रासीत्खड्गबाहुश्च राजा चंद्र इवापरः यदीयकुसुमामोदमालासुलभितोदरे
५० वारांनिधौदरैःस्वास्यन्ननशोभित्यभ्रयासद यदीयकीर्त्तिकर्पूरकणालांतिनवौ
गणे कीर्णावैरिकृतत्रासमारुतैःस्तारकाछलात् यस्यासिधारातीर्थेषु स्नातवान
रिपवो भुवि व्यावर्त्ततो दिवोद्यापि स्वर्गस्त्रीवागभमोहिताः तस्यारिमर्दनो नामप
द्दहस्ती मदोद्धतः मदांबुधारासलिलेगुंजभ्रमरमंडलः कपोलफलकोत्तीर्णम
द्धधाराजलानिलः सरोद्गारैरंजिताद्रिस्तस्य शृंगैरिवोच्चकैः यस्यांगेषु विराजंते वा
मराश्चंद्रिकोज्वलाः करिण्यस्त्ववशीताङ्गोः पतिताः काननोदरे सिंदूरपांसुपट
लीराजत्कुंभस्थलोंकुशः यः संध्यावारिदव्याप्तावयतवंज्ञमिवस्फुरत्न सक ५०
दाभिस्रावयित्वाशत्रुखलानि विद्रानपि भक्त्वास्तंभं गजस्तब्धः प्रसस्य निशि
निर्गतः आधोरणगणान्सर्वान् पार्ष्णिस्थान्स्फुरदंकुशान् क्रोधादावगणय्य

वनिजग्रालांवभंजसः तीक्ष्णांकुशमुखैर्विघ्नवध्यमानोपि वैणवैः दंडैस्तु त्रास
यामासुःसामादीन्नमनागपि ततोराजासमाविश्य किमेतत्तु कुतूहलं तत्रक
स्तिफलाभिज्ञैः समंराजकुमारकैः अदृश्यत समागत्य राजादंतावलंबली मो
दयन्नुद्धतोटोपो हर्म्यहट्टालिकमालिकं ददृशुस्तंमहाभीमं पौराद्दूरतराश्रिताः
गोपायंतःशिशूञ्जनैन्यस्तान्यकुतूहलाः रुद्धेषु तत्र मार्गेषु पलायनपरैर्जनैः वा
सितोसितदीयो यदानधारांबुसीकरैः स्नातात नाध्वनायातः सरसः कश्चन
द्विजः गीतायाःषोडशाध्यायश्लोकान्कतिपयान्पठन् निषिध्यमानो बहु
धापौरैराधोरणैरपि अमन्यमानः करिणं भीतान्नकृत वांस्ततः स्फुटत्कारि
णआहृत्य वक्त्रनिनान्विपरिप्लावयन् स्पर्शाद्दानांबुजैर्बालमायुष्मान्निर्गतो द्वि
जः ततोमहानभूत्तत्र विस्मयो वागगोचरः मानसे भूमिपालस्य पौराणाम

गी ५८ विपस्थलीं समारूढस्ततोराजाफुल्लराजीवलोचनः नमस्कृत्यद्विजंवाक्यमाहरवतीयेप्रण
म्य रावोवाच अलौकिकमिदंविप्रत्वयाद्यचरितंमहत् कृतांतकल्पादेतस्मा
द्यस्मान्निर्गतवान्जवात् कमन्त्रंपसि गीर्वाणकंमंत्रंजपसिद्विज कार्यसिद्धि
स्तवास्तीतिद्विजन्मन्समुद्दिश्य द्विजउवाच गीतायाःषोडशाध्यायश्लोका
न्कतिपयानहं जपामिप्रत्यहंनृपतेनैताःसर्वसिद्धयः ततोविहायहरिदंको
न्हलरसोन्नृपः आजन्मनोद्विजन्मानमादायनिजमंदिरं शुभेमुहूर्तेमन्त्री
द्यतोषयित्वाद्विजोत्तमं सुवर्णलक्षसंख्याकैर्गृहीतामंत्रमुपाददे गीता
याःषोडशाध्यायश्लोकान्कतिपयानपि समभ्यस्यदधौराजागजमोक्षण ५८
कौतुकं अथैकदाविनिर्गत्यबाह्याल्लिंसहसैनिकैः तमेवामोचयद्राजाम
न्नमाधोरणेर्गजान् विस्मरन्नीतिवाक्यानिराजासौम्यमनाभवत् त

णवजीवितंमत्तागजस्याग्रेविश्रांततः आदायगंडफलकमदपंक्तिनिरंकुशान् आदा
यमंत्रविश्वाद्ग न्नृपः साहसिकाग्रणीः सोहरिवमुखोदिंडुःकालास्यादिवधार्मिकः
साधुःखलस्यवदनान्नृपोनिरगमद्गजात् आगत्यनगरंराजाअभिषिच्यकुमा
रकं गीतायाःषोडशाध्यायाद्वापपरमांगतिं इतिश्रीपद्मपुराणेगीतामहा
त्म्येसतीश्वरसंवादेषोडशोध्यायः ईश्वरः षोडशाध्यायसामर्थ्यंकथितं
श्रणुसांप्रतं स्पष्टंसप्तदशाध्यायमहिमांभोनिर्धिशिवे स्वड्गबाहोःसुतस्यैव
भृत्यो दुःशासनोभवत् तंगजंधर्तुमागत्यगजाघातादमक्षयं तद्दासनानि
वहालभागजयोनिमवाप्यच गीतासप्तदशाध्यायंश्रुत्वाप्राप्तःपरंपदं देवु·
दुःशासनोगजत्वंचप्राप्यमुक्तिमितःकृतं तदेववदकल्याणविस्तरेणमम
प्रभो ईश्वरः स्थितःकश्चनदुर्मेधामंडलीकःकुमारकः बहुमल्ल्यपणकृतो

गी
५९

गजमावाह्यरक्षितः गत्वाकतिपयान्येवपदानिजनवारितः नाम्नादुःशासनो
मूढः प्रौढंवाक्यमुदीरयत् ततोनिशम्यतद्वाक्यंक्रोधांधःसिंधुरोभवत् न्यपत
त्खलुतत्पादः कंपमानःकुमारकः ततोनिपतितंकिंचिदुच्छ्वसंतंगजोरुषा ऊर्ध्व
मुन्मूलयांचक्रेकृतांतकोनिरंकुशः गतासोरपिरोषेणतस्यांगानिपृथग्गजः वि
कीर्णवान्पृथक्कृत्वामत्तोदंतावलस्ततः ततःकालेनसंप्रेत्यगजयोनिमवापसः
महत्कालंचानिनयत्सिंहलद्वीपभूपतेः मैत्रीगरीयसीसार्द्धंखड्गबाहोर्महाभु
जः ततोसौतेनमार्गेणप्रापितःसतुवारणः जयदेवस्यखड्गबाहोःप्रेष्यानीतोमही
भुजा जातिस्मरत्वंकीयांस्तःपश्यन्बंधून्सहोदरान् दुःखेनमहताकोपाद्वि ५९
वसानतिवाहयत् राजाकदाचित्तंहस्तिं समस्याश्लोकपूरणैः कस्मैचित्कवये
प्रादात्समुपायनहस्तिनं ततःसतेनकविनारोगोपहतभीरुणा मालवक्षोणि

पालस्यविक्रीतोम्नायकुंजरः कियत्यपिगतेकालेपाल्यमानोपियत्नतः मुमूर्षु
रभवत्तत्रकुंजरोदुर्धरज्वरः नजिघ्रतिपयःशीतंनादत्तेकवलंगजः स्वपित्यपिन
सौख्येनमुंचत्यश्रूणिकेवलं ततोहस्तिपकाख्यातंवृत्तांतमवनीपतिः आकर्ण्य
ससमायातोयत्रास्तेज्वरितोगजः तेनावलोक्यभूपालोगजंविस्मयकारिणं
वाचमूचेगजःशय्यांविसृज्यस्वज्वरवेदनः राजन्नशेषशास्त्रज्ञराजनीतिपयो
निधे निर्जितारातिसंघातमुरारिचरणप्रिय किमौषधैरलंवैद्यैः किंदानैः
किंतुजापकैः गीतासप्तदशाध्यायजापकंद्विजमानय तेनायंमामकोरोगो
शाम्यत्यत्रनसंशयः यथादिष्टंगजेनासीत्तथाचक्रेनराधिपः ततोगजत्वमु
त्सृज्यमुक्तोदुःशासनोभवत् अथदिव्यंसमारूढंविमानमवनीपतिः तं
दुःशासनमद्राक्षीत्पाकशासनतेजसं राजोवाच किंजातीयःकिमात्मा

गी त्वंकिंवृत्तमितितद्वद केनवाकर्मणाजातोगजःकोयमिहागतः तुष्टोराजानिवु
६० क्तोसौविमानस्थःस्थिराक्षरं वृत्तंयथावदाचख्यौनिजंदुःशासनःक्रमात गी
तासप्तदशाध्यायंजपन्मालवभूपतिः नरवर्माप्यवन्मुक्तःकालेनाल्पीयसा
ततः इतिश्रीपद्मपुराणेगीतामहात्म्येसतीश्वरसंवादेसप्तदशः श्रीः
पार्वत्युवाच उक्तंसप्तदशाध्यायगौरवंभवताशिव सत्यमष्टादशाध्यायम
हिमानमुदीरय ईश्वरः आकर्णयचिदानंदनिष्यंदनिगमोत्तरं पुण्यम
ष्टादशाध्यायमहात्म्यंगिरिनंदिनि समस्तशास्त्रसर्वस्वंश्रोत्रपात्ररसा
यनं संसारवासनाजालविदारणपरायणं परंरहस्यंविद्यानामविद्योन् ६०
मूलनक्षमं चैतन्यकैटभारातेरग्रण्यपरसंपदां विवेकवल्लरीमलंकाम
क्रोधमदापहं पुरंदरादिगीर्वाणचित्तविश्राममंदिरं सनकादिमहायोगिम

नोरंजनकारणं पाठमात्रपराभूतकालकिंकारगर्जितं अष्टोत्तरशतव्याधिमू
लोन्मूलनसायकं नातःपरतरंकिंचिद्रहस्यंहंसगामिनि निजतापत्रयहरं
महापातकनाशनं यथारसानांपीयूषमुत्तमंविश्वविश्रुतं यथागिरीणां
कैलासोयथाचंद्रोदिवौकसां तीर्थानांपुष्करंतीर्थंयथापुष्पेषुपंकजं पतिव्र
तास्वनारीषुयथालोकेष्वरुंधती यथामखेषुरवमेधोयथोद्यानेषुनंदनः
यथाकालेषुहनित्योयथापशुषुकामधुक् यथारुद्रेषुसर्वेषुवीरभद्रोमहा
बलः यथाव्यासोमुनींद्रेषुमुनिर्ब्रह्मविदुत्तमः यथादानेषुभूदानंयथागोदा
सरित्सुच यथालोकेहरिक्षेत्रंप्रशस्तंसर्वकर्मसु तथाष्टादशाध्यायमहात्म्यं
भुवनोत्तमं तत्राख्यानमिदंपुण्यंभक्त्याकर्णयपार्वति यदाकर्णनमात्रेण
जंतुःपापैःप्रमुच्यते ; अस्तिमेरुगिरेःशृंगेपुरीरम्यामरावती पुरामरविनोदा

गी॰म॰ यन्निर्मिता विश्वकर्मणा निरंतरंत्रयस्त्रिंशत्कोटिगीर्वाणभास्वरा तेजःपुंजव
६१ तीसाक्षात्फुल्लावण्येवविस्फुरता चिंतामणिशिलाबद्धाप्रासादायत्रकामदः ज
यंतिमेरुशिखरेखलुमुरवपुरावधि यत्रकल्पद्रुमच्छायांसुखासीनापुलोमजा
शृणोतिनाममालाभिर्गीतिंगंधर्वयाचितां यत्रास्तिसबलारातिर्दंभोलि
तायुधं दैत्यानांरक्तकल्लोलैःस्वर्धुनीशोणतांगता पुरातनसुधास्वादुस्मारं
स्मारंदिवौकसः धयंतियत्रक्षुत्क्षामाकलाप्रत्यहमैंदवी तस्यांकेवल्यकल्या
यामासीत्पूर्वंशतक्रतुः शचीसमन्वितःश्रीमान्गीर्वाणगणसेवितः सक
दाचित्सुखासीनोविष्णुदूतैरधिष्ठितः सहस्रनेत्रमायांतमपश्यत्पुरुषंपरं त
तस्तदीयैस्तेजोभिरभिभूतःपुरंदरः मणिसिंहासनात्तूर्णंपतितःस्थानमं ६१
डले सिंहासनमयातस्यततस्तस्यहरेर्भटाः गीर्वाणपदसाम्राज्यपद

वितेनिरे अथतस्याभिषिक्तस्यमहेंद्रस्यपुलोमजा वामांकमारुरोहाशु
दिव्यदुंदुभिनिःस्वनैः अथचिद्दिवसंगीतगीर्वाणाःप्रमदान्विताः सुराना
राजयामासुर्दिव्यरत्नैःसुरस्त्रियः ततोवैश्रवणोवृंदैराशीर्वादास्तदादुः
रंभाद्यानन्नृतुस्तस्यपुरस्तादप्सरोगणाः गंधर्वाललितालापाजगुर्म
गलकौतुकं एवंनूतनमिंद्रंतंजुष्टवकुभिलत्सवैः विनाक्रतुशतंहस्वारा
कोविस्मयमाययौ नम्रपाविहितामार्गेविडागानविनिर्मिताः नरोपि
नामहाहृस्सःपांथश्रमनिवारणाः नकदाचिद्दहोदृष्टोदेवस्त्रिपुरभैरवः
निधिवासास्थितादेवीपूजितानमहालसा मेघंकरोस्थितःशार्ङ्गधरोनो
वविलोकितः नदेववाटिकावासीदृष्टोनरहरिःस्वयं एरंडवल्लिहेरंबो

गीता नवानुपारशीलितः रेणुकानेक्षिताजातुमानापुरनिवासिनी नागोरकेपुरे
६२ ख्यातेनहिनाथोनिरीक्षितः नसन्त्यारंडिकादृष्टादानापुरनिवासिनी नभक्त्या
त्रिपुरेदृष्टस्त्रिलिंगस्त्र्यंबकः स्वयं नशार्ङ्कतडागस्थः सोमनाथोनिरीक्षि
तः वर्णयामास्थितोदृष्टोनमोहनम्नगेश्वरः नतुंगभद्रातीरस्थोदृष्टोह
रिहरः स्वयं कावेरीकर्णिकातीरेश्रीरंगोनेववीक्षितः हीनास्त्वनाथान्को
शंतः कारागारान्नमोचिताः अन्नदानेनदुर्भिक्षेप्राणिनोनेवजीवि
ताः मार्गेचयत्रकुत्रापिनकृतावकूपःप्रपाः नगोतम्याकृतंस्नानंनह ६२
ष्टोहरिणेश्वरः नदत्तमपिविप्रेभ्यःखंडकंवयोनेवपूजिताः नतीर्थेपुष्करं
मत्रंनग्रामेषुकृतामखाः नपुष्करिण्यापिकृतामध्येमार्गेवक्रूहकाः

नप्रासादाःकृताःक्वापिब्रह्मविष्णुपिनाकिनां नकदापिदुष्कांतारक्षिताः
शरणागताः कथमेतेनपापेनदेवदत्तमिहार्जितं इतिचिंताकुलोभूत्वाह
रिंप्रपुरंदरः ययौसरभसःखिन्नः क्षीराकूपारगह्वरं तत्रप्रविश्यगो
विंदंनत्वातुष्टावसंस्तवैः अकस्मान्निजसाम्राज्यभ्रंशदुःखमवापसः
इंद्रउवाच रमाकांततवप्रीत्यैकृतंक्रतुशतंपुरा तेनपुण्येनसंप्राप्त
मयापौरंदरंपदं इदानींनूननःकोपिजातोद्विपुरंदरः नतेनधर्मोवि
क्षितोनतेनकैतवःकृतः ममसिंहासनंदिव्यंकथमाक्रांतमच्युत ईश्व
रउवाच इत्येवंवदतस्तस्यश्रुत्वावाक्यंरमापतिः उन्मीलितस्मितास्या
सोप्युवाचमधुरंवचः श्रीभगवानुवाच किंदानैरल्पफलदैः किंतपा

गी॰ भिःक्रिमध्वैरैः सेव्यमानैःक्षितितलेसमंप्रीणितवान्पुरा इंद्रउवाच भ
६३ गवन्कर्मणाकेनसत्वांप्रीणितवान्द्विजः यत्प्रीतोभगवान्प्रादात्तस्मैपौर
दरंपदं श्रीभगवानुवाच जपत्यष्टादशाध्यायंगीतायाःश्लोकपंचकं
तेनपुण्येनसंप्रादात्तस्मैसाम्राज्यमुत्तमं इतिविष्णोर्वचःश्रुत्वागतो
पायंपुरंदरः विप्रवेषधरोभूत्वागतोगोदावरीतटं तत्रापश्यत्परंपुण्य
कालिकाग्राममुत्तमं तत्रकालेश्वरोदेवोवर्त्ततेकालमर्दनः तत्रगोदा
वरीतीरस्थितंपरमधार्मिकं अपश्यत्करुणार्द्रंतंब्राह्मणंवेदपार
गं नित्यमष्टादशाध्यायंजपंतंदीप्ततेजसं ततस्तच्चरणद्वंद्वंलुठं ६३
श्चापरयामुदा सततमष्टादशाध्यायमपठत्तेनाशिक्षितं अथपुण्ये

नतेनासौविष्णोःसायुज्यमाययौ हित्वापौरंदरंस्थानंदेवानांपदमल्पकं
अतएवपरंतत्त्वंमुनीनामिदमुत्तमं दिव्यमष्टादशाध्यायमहात्म्यं
६४ कथितंमया यस्यश्रवणमात्रेणसर्वपापैःप्रमुच्यते इतिश्रीपद्म
पुराणेगीतामहात्म्येसतीश्वरसंवादेअष्टादशोध्यायः श्रीसांबशि
वार्पणमस्तु श्रीः श्रीः श्रीः श्रीः श्रीः श्रीः
॥मुनिगोत्रधरानाथयातेशाकेयुवाब्दके श्रीसप्तनाथसान्निध्येसमा॥
श्रीः
॥पितमिदंशुभम् ६४